# shrIgaNeshapUrvashatakam

# શ્રીગણેશપૂર્વશતકમ્

## Document Information

Text title : Ganesha Purvashatakam 06 31

File name : gaNeshapUrvashatakam.itx

Category : ganesha, shataka

Location : doc_ganesha

Author : nIlakaNThashAstri

Proofread by : Gopalakrishnan

Description/comments : See accompanying gaNeshottarashatakam, From stotrArNavaH 06-31

Latest update : September 10, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીગણેશપૂર્વશતકમ્

સત્યજ્ઞાનાનન્દં ગજવદનં નૌમિ સિદ્ધિબુદ્ધીશમ્ ।
કુર્વે ગણેશશતકં કુજુકેનાહં સ્વબુદ્ધિશુદ્ધ્યર્થમ્ ॥ ૧॥

દિઙ્માત્રેણ ગણપતેર્ગુણગણવિભવાદિવર્ણનારૂપમ્ ।
પ્રાયો વૈનાયકકૃતિવિદિતમતપક્રિયાવિવૃતિપૂર્વમ્ ॥ ૨॥

યદ્યપિ મન્દમતિરહં ગુણલવમવગન્તુમતિતરાં નાલમ્ ।
પ્રયતે તથાપિ વદિતું લમ્બોદર તે દયાવલમ્બેન ॥ ૩॥

જગતઃ સર્ગાદાદ્યાત્ પ્રાગપ્યેકસ્ત્વમેવ ભાસિ વિભો ।
તસ્માદ્ગણપ ભવન્તં નિખિલનિદાનં ગદન્તિ નિગમાન્તાઃ ॥ ૪॥

ત્વમતો માયાતીતં સકલજગત્કલ્પનાદ્યધિષ્ઠાનમ્ ।
અદ્વૈતસીમભૂતં વાઙ્માનસાગોચરં પરં બ્રહ્મ ॥ ૫॥

સગુણબ્રહ્માત્માનો ગણપતિશિવશક્તિકેશવાર્કા યે ।
તેષાં કારણમાહુઃ શુદ્ધાદ્વૈતાનુગા યમાત્માનમ્ ॥ ૬॥

યઃ સર્વવેદવેદ્યસ્તત્ત્વમસિપદાદ્યતીતરૂપો યઃ ।
યો યોગિવૃન્દમૃગ્યઃ પરમાત્માનં તમાશ્રયે નિત્યમ્ ॥ ૭॥

યત્પૂર્ણયોગલભ્યં ભૂમાત્મકમામનન્તિ ગાણપતાઃ ।
શુદ્ધં સ્વમહિમસંસ્થં બ્રહ્માસ્મિન્ મે મનઃ સદા સ્મરતામ્ ॥ ૮॥

ભૂમા બ્રહ્મૈતત્ તે ષષ્ઠં ગણપં ચ પઞ્ચમં પ્રાહુઃ ।
તુર્યં ગણેશમસ્ય હિ કાર્યાન્ સગુણાત્મનોઽપિ તાન્ પઞ્ચ ॥ ૯॥

તત્રોપાસનકાણ્ડે પરકાષ્ઠાભૂતમસિપદાર્થમયમ્ ।
સ્વાનન્દં બ્રહ્મૈતદ્ગજવદનમહં ભજે જગદ્વન્દ્યમ્ ॥ ૧૦॥

ગાણપતપુઙ્ગવાઃ કિલ પાદમયાન્યસ્ય પઞ્ચમસ્યાહુઃ ।
શૈવાદ્વૈતાદીનાં મુખ્યબ્રહ્માણિ યાનિ ચત્વારિ ॥ ૧૧॥

અવ્યાકૃતં તુરીયં બ્રહ્મ ત્રિગુણાત્મકં ગુગણેશાખ્યમ્ ।
વિદ્યાત્મકં ગણપતે સતતં દૂરીકરોતુ મમ દુરિતમ્ ॥ ૧૨॥

યસ્ય હિ નાભિર્બ્રહ્મા વદનં વિષ્ણુશ્ચ લોચનં રુદ્રઃ ।
શક્તિશ્ચ વામપાર્શ્વં દક્ષિણમર્કોઽસ્મિતામયસ્ત્વાત્મા ॥ ૧૩॥

જાગ્રત્સ્વપ્નસુષુપ્તબ્રહ્મ ત્રિગુણાત્મકં ચ યત્પ્રોક્તમ્ ।
વ્યાકૃતમાવિદ્યકમપિ તદપિ વ્યક્તં ચકાસ્તુ મે ચિત્તે ॥ ૧૪॥

બ્રહ્મ સ્વાનન્દાત્મકવિદ્યાઽવિદ્યાત્મકપ્રભેદેન ।
ભૂમબ્રહ્મ ચતુષ્પાત્ પ્રકાશતાં મેઽનિશં હૃદાકાશે ॥ ૧૫॥

માયાસમરસયુક્તં શાન્તિગતં નિષ્કલં પરં જ્યોતિઃ ।
યદ્બ્રહ્મ પાદરૂપં ગાણેશાદ્વૈતલક્ષ્યભૂતમસિ ॥ ૧૬॥

યો બ્રહ્મપાદ આદ્યઃ સંયોગાયોગપાદયુગયુક્તઃ
તૌ પાદાવપ્યુદિતાવધ્યારોપાપવાદપરકાષ્ઠે ।
સદસત્સહજસમાત્મકચતુર્વિધાનન્દપાદરૂપસ્ત્વં
રવિશક્તીશહરીણાં સઙ્ઘાતસ્ત્વં શ્રુતોઽસિ ગણરાજ ॥ ૧૭॥

બિન્દુઃ સોઽહમ્બોધઃ સાઙ્ખ્યશ્ચેતિ પ્રસિદ્ધભેદયુતઃ ।
વિદ્યાપાદોઽપિ ત્વં યોગિસમાધૌ ગૃહીતસુવિશેષઃ ॥ ૧૮॥

તુર્યાવિદ્યાપાદસ્ત્વમેવ સત્યાનૃતો જગદ્રૂપઃ ।
સ વિરાટ્ હિરણ્યગર્ભાવીશગુણેશાવિતિ પ્રભેદયુતઃ ॥ ૧૯॥

બ્રહ્માંશસ્થિતિભેદાઃ સર્વે ચૈતે સ્ફુરન્તુ મમ ચિત્તે ।
પ્રાયોઽસમ્પ્રજ્ઞાતસમાધિજ્ઞેયા ગણેશ કરુણાબ્ધે ॥ ૨૦॥

સિદ્ધિર્બુદ્ધિશ્ચેતિ દ્વિધા હિ વૈનાયકી મહામાયા ।
લોકૈકનાયિકા સા તદુપાધિવશાત્ કિલાસિ બહુધા ત્વમ્ ॥ ૨૧॥

એવં માયોપાધિકપરાત્મરૂપં હિ પઞ્ચધા ભિન્નમ્ ।
તદદસ્થાગુણભેદાન્નીરૂપસ્યાપિ તે સમામ્નાતમ્ ॥ ૨૨॥

સદ્બ્રહ્મ કિલ પ્રથમં સકલજગદ્બીજભૂતરૂપં ત્વમ્ ।
મૂર્તિં વિનાયક ઇતિ સ્વેચ્છાવશતો ગણેશ ગૃહ્ણાસિ ॥ ૨૩॥

બીજસ્ય ભૂમિરૂપા કેવલમાયાદ્વિતીયમૂર્તિસ્તે ।
વર્તયતિ કૃત્યમખિલં ભુવનેશી સા શિવો પરાશક્તિઃ ॥ ૨૪॥

માયેશં તુ તૃતીયં રવિમણ્ડલગં હિરણ્મયં પુરુષમ્ ।
ત્વામામનન્તિ વેદા હ્યનવરતં કાલચક્રનેતારમ્ ॥ ૨૫॥

ઉપહિતતુરીયમૂર્તિર્માયાયુક્તઃ પરઃ શિવો ગિરીશઃ ।
કલ્પાન્તકાલરૂપી ત્વમેવ સર્વં ચ સઞ્જરીહર્ષિ ॥ ૨૬॥

માયામયો હિ વિષ્ણુર્માયોપાધેશ્ચ પઞ્ચમી મૂર્તિઃ ।
સોઽપિ ત્વમેવ નિખિલં લોકં પાલયસિ લીલયા સતતમ્ ॥ ૨૭॥

એવં માયાવશતો રવિશિવશક્ત્યાદિનામપઞ્ચકભાક્ ।
દિશતુ મદીપ્સિતમખિલં શુદ્ધબ્રહ્માત્મકં ભવદ્રૂપમ્ ॥ ૨૮॥

માયાબદ્ધઃ ષષ્ઠઃ પ્રથમશરીરી હિરણ્યગર્ભસ્ત્વમ્ ।
તત્તત્કર્માનુગુણં કરોષિ સર્ગં સમસ્તલોકસ્ય ॥ ૨૯॥

પ્રાક્ પદ્માસનરૂપગ્રહણાદ્ભવતોઽપ્યુપાધિતો ભિન્નાઃ ।
એતાશ્ચ સગુણમૂર્તીરાલમ્બ્ય મતાનિ પઞ્ચ જાતાનિ ॥ ૩૦॥

એતે હિ પઞ્ચ દેવાઃ સ્વસ્વાધારેષુ સન્તિ સર્વત્ર ।
વર્ણસ્વધર્મવિભવાત્તેજોરૂપાસ્ત્રિવર્ણ દેહેષુ ॥ ૩૧॥

ગાયત્રીગ્રહણેન હિ તત્તતેજો વિશેષતો ભાતિ ।
તત્તજ્જાતિગુણા અપ્યુત્કૃષ્ટત્વેન તેન જાયન્તે ॥ ૩૨॥

મૂલાધારે ગણપો મણિપૂરે હરિરનાહતે શમ્ભુઃ ।
રાજતિ રવિર્વિશુદ્ધૌ બ્રહ્મસુરન્ધ્રે શિવા પરા શક્તિઃ ॥ ૩૩॥

અપિ ચ ષડાધારેષુ પ્રાપ્યૈવં ધ્યાનયોગચિત્તલયૌ ।
મુક્તા ભવન્તિ તસ્માત્ પઞ્ચાયતનાર્ચનેઽતિહર્ષસ્તે ॥ ૩૪॥

ગણપતિપઞ્ચાયતનં પઞ્ચાયતનં રવીશ્વરાદીનામ્ ।
યદ્વા તદ્વા કૃતમપિ પૂજાવિષયેઽતિમાત્રતૃપ્તિસ્તે ॥ ૩૫॥

પ્રાસાદશુદ્ધપૂજા અત એવ વિહાય પઞ્ચદેવાનામ્ ।
પઞ્ચાયતનસપર્યાં સગુણસમષ્ટયર્ચનાં વદન્તિ બુધાઃ ॥ ૩૬॥

હર્યાદિગણેશાન્તાઃ પઞ્ચૈતા બ્રહ્મમૂર્તયો મુનિભિઃ ।
અત એવ પ્રણવસ્ય ચ ગાયત્ર્યાશ્ચાપિ દેવતાઃ પ્રોક્તાઃ ॥ ૩૭॥

વ્યાચક્ષતે હિ ઋષયો ગાયત્ર્યાઃ પઞ્ચદેવતાપરામ્ ।
પ્રણવસ્યાપિ તથૈવ પ્રપઞ્ચયન્તિ સ્મ પઞ્ચધાપ્યર્થાન્ ॥ ૩૮॥

અત એષાં પઞ્ચાનાં બ્રહ્મત્વનિરૂપણે નિષ્ણાતાઃ ।
ઉત્તરમીમાંસાઃ ષટ્ શુદ્ધાદ્વૈતેન તેનિરે મુનયઃ ॥ ૩૧॥

પ્રતિપાદયન્તિ ચૈતે યદ્યપ્યાપાતતો વિભિન્નાન્ વૈ ।
સર્વેષાં હિ ઋષીણાં પ્રાયસ્ત્વય્યેવ પરમતાત્પર્યમ્ ॥ ૪૦॥

એતે પઞ્ચ મતસ્થા ભવતઃ સર્વેષુ પૂર્વપૂજ્યત્વમ્ ।
વિઘ્નાધિપત્યમઙ્ગીકુર્વન્તિ યતો ગણાધિપત્યં ચ ॥ ૪૧॥

ભૂગતબીજાદિ યથા પાદપરૂપેણ જાયતે જગતિ ।
બ્રહ્મૈવ બીજભૂતં પ્રકૃતિઃ પૃથિવી તયા હિ સંયોગાત્ ॥ ૪૨॥

કારણસૂક્ષ્મસ્થૂલપ્રપઞ્ચરૂપેણ જાયતે ક્રમશઃ ।
મૂલં ગણપતિરૂપં પ્રપઞ્ચરૂપસ્ય પાદપસ્યૈવમ્ ॥ ૪૩॥

બુદ્ધિઃ સિદ્ધિશ્ચ ફલે મૂલં ગણપોઽસ્ય વિશ્વરૂપતરોઃ ।
શાખાઃ કેશાઃ કન્દં ત્વર્કોઽખિલમૂલમુચ્ચસેઽતસ્ત્વમ્ ॥ ૪૪॥

સૂલે જલસેકાત્ કિલ તરુપત્રફલાદયોઽપિ વર્ધન્તે ।
તવ પૂજયા ગણપતે રવિશિવશક્ત્યાદયોઽપિ તૃપ્યન્તિ ॥ ૪૫॥

એવં સગુણબ્રહ્મવ્યપદેશવતાં ચ પઞ્ચ દેવાનામ્ ।
પૂર્ણકલાંશાંશાંશાવતારરૂપાશ્ચ મૂર્તયોઽનન્તાઃ ॥ ૪૬॥

ભવતઃ કતિપયમૂર્તીરાવિર્ભાવાવતારતારમુખાઃ ।
વૈનાયકમતવિદિતપ્રક્રિયયૈવ બ્રવીમિ હેરમ્બ ॥ ૪૭॥

સત્યં જ્ઞાનમનન્તં જ્યોતીરૂપં ચ નિર્ગુણં બ્રહ્મ ।
એતન્નિર્વ્યાપારં ગજપદવાચ્યં લયાદિહેતુત્વાત્ ॥ ૪૮॥

યોગીન્દ્રા ગચ્છન્તિ હિ સમાધિનાત્રેતિ ગઃ સ્મૃતો મુનિભિઃ ।
પ્રણવાત્મકજગદસ્માજ્જાયત ઇતિ જઃ સ્મૃતિપ્રતીતાર્થઃ ॥ ૪૯॥

ગશ્ચાસૌ જશ્ચેતિ વ્યુત્પાદયતિ સ્મૃતિર્હિ ગજશબ્દમ્ ।
એષ પ્રતિપદાયતિ પ્રભવાપ્યયકારણં પરં બ્રહ્મ ॥ ૫૦॥

મૂલપ્રકૃતિસ્ત્રિગુણા શુક્તૌ રજતં યથા તતો જાતા ।
તદ્ગતચિત્પ્રતિબિમ્બં સગુણબ્રહ્મેતિ કીર્તિતં મુનિભિઃ ॥ ૫૧॥

ઓઙ્કારબ્રહ્મેતિ ચ નર ઇતિ નામ્ની પ્રકીર્તિતે તસ્ય ।

સકલજ્યોતીરૂપં સગુણસ્યોક્તં હિ તત્ત્વવિદ્ભિઃ ॥ ૫૨॥

મૂલાવિદ્યાગતનરમદ્વૈતબ્રહ્મરૂપમપિ બિભ્રત્ ।
નિર્ગુણસગુણજ્યોતીરૂમુભયથા તૃતીયમપ્યુક્તમ્ ॥ ૫૩॥

અદ્વૈત ઇતિ સદાત્મેત્યામ્નાયન્તે તથા મહાવાક્યાઃ ।
ઇત્યુક્તાનિ ક્રમતો નામાન્યેષાં સ્મૃતીતિહાસાદૌ ॥ ૫૪॥

નરવાચ્યસકલરૂપો ગજવાચ્યો નિષ્કલસ્વરૂપસ્ત્વમ્ ।
વિઘ્નેશ સકલનિષ્કલરૂપમહાવાક્યમૂર્તિધારી ત્વમ્ ॥ ૫૫॥

ઓં તત્સદિતિ હિ ભેદાદ્બ્રહ્મ પ્રોક્તં ત્રિધા સુધીભિરપિ ।
પ્રથિતં મૂર્તમમૂર્તં મૂર્તામૂર્તં ત્રિધા તદેવમપિ ॥ ૫૬॥

નામાન્તરાણિ સર્વાણ્યેતાન્યુદિતાનિ વેદશીર્ષેષુ ।
કમલાવલ્લભ ભવતઃ પૂર્વોક્તત્રિવિધરૂપધારયિતુઃ ॥ ૫૭॥

અપિ ચાન્યાનિ ગણપતે નામાનિ સહસ્રશઃ પ્રસિદ્ધાનિ ।
કર્મજ્ઞાનોપાસનકાણ્ડેષુ પૃથગ્વિનાયકાદીનિ ॥ ૫૮॥

નિર્ગુણરૂપધ્યાનં ન સાધકાલા પ્રસિધ્યતિ ક્ષિપ્રમ્ ।
તદનુગ્રહાય ધરસે (ધત્સે)ધીપરિપાકાનુરૂપરૂપાણિ ॥ ૫૯॥

મન્દાધિકારિણામપિ યથા રુચિઃ સ્યાત્તદાનુગુણ્યેન ।
વિગ્રહવરા ગૃહીતાઃ સર્વે તે માં સદાનુગૃહ્ણન્તુ ॥ ૬૦॥

કૈલાસે વૈકુણ્ઠે હિરણ્મયપુરે ચ યા મણિદ્વીપે ।
પૂજ્યન્તેઽનયસ્મિન્ વા સર્વા મૂર્તીશ્ચ તાસ્તવોપાસે ॥ ૬૧॥

અષ્ટોત્તરં શતં વા સહસ્રમત્યષ્ટ મધિકા શ્ચ મૂર્તયો વા તે ।
મુખ્યત્વેન ખ્યાતાઃ ખેલન્ત્વખિલાઃ સદા મમ સ્વાન્તે ॥ ૬૨॥

કાશ્ચન પત્નીહીના બહુશક્તિયુતાશ્ચ મૂર્તયઃ કાશ્ચિત્ ।
પાન્ત્વેકદન્ત ભવતોઽપ્યેકત્યષ્ટાદિશક્તયઃ સર્વાઃ ॥ ૬૩॥

બહુફલપુષ્પમહી રુહનિકરારામં નિઘાટિતકવાટમ્ ।
આરામેશસમીપે નિષ્ઠન્ કૃત્વાહ્યારામેશિતૃસવિધે યથોપવનપાલઃ (?) ॥ ૬૪॥

નોદ્ઘાટયતિ કવાટં સ્વામ્યાદેશં વિના પ્રવેશાય ।
તદ્વન્નોદ્ઘાટયતિ સ્વાધિષ્ઠાનાદિ નિજકવાટાનિ ॥ ૬૫॥

સર્વશરીરિશરીરે મૂલાધારસ્થિતા હિ કુણ્ડલિની ।
(મૂલાધારસ્થકુણ્ડલિનીશક્તિઃ)
આવૃત્ય ષડાધારાન્ મૃદ્ભાણ્ડમિવાસ્તિ મૂલવહ્નેર્યા ॥ ૬૬॥

યદ્વચ્છમીદ્રુમેઽગ્નિસ્તદ્વન્મૂલાનલે ભવાન ગણેશો સ્તિ ।
તત્રત્યસિદ્ધિબુદ્ધ્યાદ્ધિ યુતભવદાજ્ઞાં ગણપાજ્ઞાં વિના કદાચિદપિ ॥ ૬૭॥

યદિ તવ પૂજા ક્રિયતે વિનાયકોદ્ઘાટિતાઃ ષડાધારાઃ ।
અત એવ પૂર્વપૂજ્યઃ સર્વા કર્મા સ્મ્ભેત્વમેવ દેવાદ્યૈઃ ॥ ૬૮॥

શુક્લામ્બરેતિમન્ત્રં પ્રોચ્ચાર્ય ચતુર્મુખાદયોઽપિ ત્વામ્ ।
શ્વેતવિનાયકમૂર્તિં ધ્યાત્વા કુર્વન્તિ કુટ્ટનં મુષ્ટ્યા ॥ ૬૯॥

સર્વશરીરિશિરસ્થા મૂર્ધનિ કરકુટ્ટનાત્ સુધા ગલિતા ।
પતતિ સુષુમ્નાનાડિદ્વારા મૂલાદુપર્યુપોદ્ધતયા ॥ ૭૦॥

સિદ્ધ્યા બુદ્ધ્યા ચ યુતે મૂલાધારસ્થગણપતૌ ભવતિ ।
તેન પ્રસીદતિ ભવાન્ કરોતિ કર્માર્હમન્તરાત્માનમ્ ॥ ૭૧॥

તાદૃશકુટ્ટનતુષ્ટં શ્વેતવિનાયકમનારતં કલયે ।
પીયૂષમથનસમયે પુરુહૂતમુખૈશ્ચ પૂજિતો યોઽભૂત્ ॥ ૭૨॥

ભવતસ્તેજોરૂપં નરામરાદ્યૈર્ન શક્યતે દ્રષ્ટુમ્ ।
અત એવ નયનવિષયં ગૃહ્ણાસિ ત્વં ગજાનનશરીરમ્ ॥ ૭૩॥

નૃગજાત્મકરૂપત્વાન્નિર્ગુણસગુણસ્વરૂપવત્ત્વાચ્ચ ।
હેલમ્બોદર સ્યાદેકદન્ત ભવતો ગજાનનાખ્યા સુવિશ્રુતામ્નાયે ॥ ૭૪॥

ગજપદવાચ્યં હિ મુખં પ્રથમં કાર્યં હિ યસ્ય દેવસ્ય ।
અત એવ વા સ કથિતો ગજમુખનામેતિ મન્વતે મુનયઃ ॥ ૭૫॥

ત્યક્ત્વા માયાવદનં ગજવદનં નિર્ગુણં દધૌ દેવઃ ।
યો લીલયા ગણેશસ્તં ત્વાં શરણં સદા પ્રપદ્યેઽહમ્ ॥ ૭૬॥

વિગતો નાયક ઇતિ સા વિનાયકાખ્યા શ્રુતૌ સમામ્નાતા ।
સર્વેષાં હિ વિશેષાન્નાયક ઇત્યપ્યભિપ્રયન્ત્યર્થમ્ ॥ ૭૭॥

વિઘ્નોઽભિહિતો જગતાં સામર્થ્યસ્ય હિ વિશેષતો હનનાત્ ।
ઉક્તઃ સ એવ કાલસ્તન્નાથત્વાત્ ત્વમેવ વિઘ્નેશઃ ॥ ૭૮॥

જીવેશ્વરા હિ વશગા ભવન્તિ કાલાત્મનઃ પરેશસ્ય ।

તદધીશ્વરસ્ય ભવતો વિઘ્નેશત્વે કિમસ્તિ વક્તવ્યમ્ ॥ ૭૯॥

સર્વબ્રહ્માણ્ડાનાં સ્વતન્ત્રદેવો વિનાયકો રાજા ।
રાજપ્રતિનિધિરર્કઃ સહાયભૂતા શિવા મહારાજ્ઞી ॥ ૮૦॥

સૃષ્ટિસ્થિતિસંહારાન્ કર્તારો ધાતૃહરિગિરીશાશ્ચ ।
રાજ્યાધિકારસચિવાઃ સન્તિ ભવાની દિવાકરાદ્યાશ્ચ ॥ ૮૧॥

યદ્રાજ્યરક્ષણાયૈતત્સેનાપતિતાં ગુહો મહાસેનઃ ।
તજ્જ્યેષ્ટરાજનામા ગજાનનોઽભૂદિતીરિતં મુનિભિઃ ॥ ૮૨॥

યસ્ય જ્યેષ્ઠાભાવાજ્યેષ્ઠત્વાદપિ ચ રાજભાવવતામ્ ।
તજ્જ્યેષ્ઠરાજનામ પ્રોક્તં સ સદા વિરાજતાં ચિત્તે ॥ ૮૩॥

યસ્યોદરમવલમ્બશ્ચરાચરાણાં હિ સર્વજન્તૂનામ્ ।
માતાપિતરાવપિ પ્રલયે સ્થિત્યાદાવપિ જન્માદાવપિ
યઃ સદૈવ લમ્બોદરં તમવલમ્બે ॥ ૮૪॥

શૂર્પસ્તુષમિવ કલુષં નિરસ્યતીત્યસ્ય ।
(શૂર્પકર્ણાખ્યા કર્ણાદસ્યતિ હિ શૂર્પકર્ણોઽતઃ)
વિગલિતરજસ્તમોમલમતિપૂતં માં કરોતુ સ ગણેશઃ ॥ ૮૫॥

બ્રહ્માત્મમસ્તકત્વાત્ કણ્ઠાધો માયિકસ્વરૂપત્વાત્ ।
વક્રં દેહવિલક્ષણમસ્ય તુ તુણ્ડં સ વક્રતુણ્ડોઽતઃ ॥ ૮૬॥

માયાવાચક એકઃ દન્તઃ સત્તાત્મવાચકશ્ચ તયોઃ ।
યોગો ગણેશ ઇત્યત ઉક્તોઽસાવેકદન્તામ્નાપિ ॥ ૮૭॥

બ્રહ્માત્મનાં પતિત્વાન્માયાગૌરીમહેશ્વરાદીનામ ।
અન્નપ્રાણપ્રભૃતિપ્રણવાન્તબ્રહ્મણાં પતિત્વાચ્ચ ॥ ૮૮॥

યં બ્રહ્મણમ્પતિરિતિ પ્રાહુર્વેદાધિપત્યતોઽપ્યેવમ્ ।
તમહં સર્વાધીશં સતતં પરિશીલયામિ વિઘ્નેશમ્ ॥ ૮૯॥

બ્રહ્માદિસ્તમ્બાન્તપ્રાણિગણાનામધીશ્વરો યતઃ ।
સગુણબ્રહ્મગણાનામપિ તસ્માત્ ત્વં ગણેશ ઇત્યુક્તઃ ॥ ૯૦॥

યન્નામરૂપભોગાન્ માયાગૂઢોઽન્તરેવ મુષ્ણાતિ ।
તન્મૂષકઃ સ્વવાહો યસ્ય સ ગણપો વિહરતુ મમ મનસિ ॥ ૯૧॥

મૂલપ્રકૃતિઃ પત્ની જહાતિ ચૈનાં તુ ભુક્તભોગાં યઃ ।

પત્નીહીનોઽભિહિતસ્તતો ગજાસ્યોઽનિશં સ માં પાતુ ॥ ૯૨॥

બ્રહ્મણિ વેદે ચરતીત્યર્થમભિપ્રેત્ય વેદગમ્યત્વાત્ ।
તં બ્રહ્મચારિશબ્દં કુઞ્જરવદને પ્રયુઞ્જતે કવયઃ ॥ ૯૩॥

બ્રહ્માત્મમસ્તકત્વાત્તસ્ય મહાવાક્યગણપતેશ્ચ વિભોઃ ।
તેન ચ સહસઞ્ચારાદાહુર્વા બ્રહ્મચારીતિ ॥ ૯૪॥

આત્મારામત્વાદપિ ચરતિ બ્રહ્મણ્યબાહ્યવૃત્તિરિતિ ।
યમિહામનન્તિ મુનયઃ પાયાત્સ બ્રહ્મચારિદેવો ગણપો મામ્ ॥ ૯૫॥

સન્ દ્વાપરે પરાશરપુત્રઃ સિન્દૂરદાનવં ન્યવધીત્ ।
યદ્બ્રહ્મચર્યવર્તી ગદિતોઽતો બ્રહ્મચારિશબ્દેન ॥ ૯૬॥

વિમલકમણ્ડલુતટિનીતીરમયૂરેશનગરવર્યે યઃ ।
ભૂસ્વાનન્દે સુચિરાદાવિર્ભૂતોઽદ્ભુતાનિ કૃત્યાનિ ॥ ૯૭॥

લોકાનુકૂલભૂતાન્ સિન્ધુવધાદીંશ્ચ બહુવિધાન્ વ્યદધાત્ ।
નિખિલાનુગ્રહનિરતઃ સતતં દ્વૈમાતુરઃ સ માં પાયાત્ ॥ ૯૮॥

યત્કોપપાવકાર્ચિષ્યસુરૌ ચણ્ડપ્રચણ્ડનામાનૌ ।
પ્રાપ્તૌ પતઙ્ગભાવં પાલયતુ સ માં સદૈવ વિઘ્નેશઃ ॥ ૯૯॥

યશ્ચાષ્ટગન્ધનિર્મિતચન્દનગણપો પુરા ભૃગોઃ સુતયા ।
રમયા પ્રપૂજિતઃ સન્ વિવાહસમયે પુરાણપુરુષસ્ય ॥ ૧૦૦॥

દુર્ગન્ધાસુરમવધીન્મધુકૈટભમેદસઃ સમુદ્ભૂતમ્ ।
યોઽપિ ચ ગવ્યગણપતિર્મહિતો ગોલોકરાધયા પૂર્વમ્ ॥ ૧૦૧॥

ગવ્યૈઃ પયોદધિઘૃતૈર્જઘાન પાપાસુરં દુરાત્માનમ્ ।
વરિવસ્યામ્યનવરતં તં વિઘ્નેશં દયાપયોરાશિમ્ ॥ ૧૦૨॥

યં હારિદ્રગણપતિં હિમવદ્દુહિતા મહેશ્વરશ્ચાપિ ।
સ્વીયે વિવાહસમયે હ્યપૂજયેતાં ચ દમ્પતી પ્રાઞ્ચૌ ॥ ૧૦૩॥

યશ્ચ હરિદ્રાબિમ્બાદાવિર્ભૂતો ગણેશ્વરઃ સદ્યઃ ।
અવધીદમઙ્ગલાસુરમન્યમપરમારનામકં હ્યસુરમ્ ॥ ૧૦૪॥

ગૌરીહરવચનાદ્યં ચ શુભાદૌ પ્રપૂજયન્ત્યદ્ય ।
મમ હારિદ્રગણપતિર્હરતુ સ દુરિતં સમસ્તમપિ સદ્યઃ ॥ ૧૦૫॥

કૃતયુગસમયે યોઽસૌ કાશ્યપપુત્રો મહોત્કટો ભૂત્વા ।
દેવાન્તકં નરાન્તકમપિ નામ્ના તાવહન્મહાદુષ્ટૌ ॥ ૧૦૬॥

પ્રાપયદાનન્દભુવં સશરીરં કાશિરાજમપિ ભક્તમ્ ।
અકરોચ્ચાદ્ભુતલીલામહોત્કટં ત્વામહં સદાર્હામિ ॥ ૧૦૭॥

યોઽપિ વરેણ્યાય પુરા ગણેશગીતાં હિતામુપદિદેશ ।
સ વરેણ્યરાજપુત્રો ગજાનનો મે તનોતુ કુશલતતિમ્ ॥ ૧૦૮॥

ધૂમ્રવિનાયકમૂર્તિં ગ્રહીષ્યસિ ત્વં કલેર્યુગસ્યાન્તે ।
સર્વાંશ્ચ નિગ્રહિષ્યસિ વિપ્લુતમતકૃત્યનાસ્તિકપ્રાયાન્ ॥ ૧૦૯॥

શિશ્નોદરમાત્રપરા જાતિવિભાગાદિવર્જિતાઃ સર્વે ।
ધૂમ્રવિનાયક (ધૂમધ્વજેન) ભવતા સમૂલઘાતં હતા ભવિષ્યન્તિ ॥ ૧૧૦॥

॥ ઇતિ શ્રીવિદ્વદ્રત્નોપનામકેન વૈયાકરણશિરોમણિના વૈદિકષડ્દર્શનીસારવેદિના
નીલકણ્ઠશાસ્ત્રિણા વિરચિતં ગણેશપૂર્વશતકં સમાપ્તમ્ ।

Proofread by Gopalakrisnan

*shrIgaNeshapUrvashatakam*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*